संस्कृतव्याकरणम्

MAVYC202

परिभाषेन्दुशेखरः-2

द्वितीयपत्रम्

पूर्णाङ्काः – 80

समयः – घण्टात्रयम्

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् । 1×10 =10

1. परिभाषेन्दुशेखरस्य द्वितीयं प्रकरणं किम् ?
2. शब्दान्तरस्य प्राप्नुवन् विधिरनित्यः, इति परिभाषा कुत्र स्पष्टा ?
3. स्वरभिन्नस्य प्रप्नुवन्विधिः नित्यो अनित्यो वा ?
4. अन्तरङ्गघटकस्य अङ्गशब्दस्य कोऽर्थः ?
5. नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः, इति परिभाषायाः ज्ञापकं किम् ?
6. अन्तरङ्गान् विधीन् बहिरङ्गो लुग्बाधते, इति परिभाषायाः उदाहरणं किम् ?
7. अकृतव्यूहाः के ?
8. अपवादपदार्थस्य कोऽर्थः ?
9. पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः, इत्यत्र अभिनिविशन्ते इति पदस्य कोऽर्थः?
10. प्रकल्प्य चापवादविषयं तत उत्सर्गा अभिनिविशन्ते, इति परिभाषायां प्रकल्प्यशब्दस्य कोऽर्थः?

अधस्तनेषु पञ्चप्रश्नाः समाधेयाः। 6×5 =30

11. पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः,इति परिभाषां व्याकुर्वन्तु ।
12. लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः इत्यस्याः परिभाषायाः नागेशदिशा व्याख्या विधेया।
13. वर्णादाङ्गं बलीयो भवति, इति परिभाषायाः फलं नागेशदिशा प्रतिपादयत ।
14. मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्,इति परिभाषा ग्रन्थदिशा व्याख्येया।
15. प्रकल्प्य चापवादविषयं तत उत्सर्गा अभिनिविशन्ते, इति परिभाषायाः अर्थं फलञ्च वर्णयत।
16. उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्,इति परिभाषां स्वाधीतग्रन्थदिशा व्याकुर्वन्तु।
17. "विकरणेभ्यो नियमो बलीयान्' इति परिभाषायाः ज्ञापकस्य त्रयान् पक्षान् निरूपयत।

अधस्तनेषु प्रश्नेषु चत्वारः समाधेयाः । 10×4 =40

18. 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवे'ति परिभाषा नागेशदिशा वर्णनीया ।
19. 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषायाः प्रमाणं फलञ्च प्रतिपादयत ।
20. 'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः' इति परिभाषाया अवतरणं ज्ञापकम् अर्थञ्च लिखत।
21. 'क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते' इति परिभाषां सावतरणं व्याकुर्वन्तु ।
22. 'अभ्यासविकारेषु बाध्यबाधकभावो नास्ति' इति परिभाषां सावतरणं वर्णयत ।
23. 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इति परिभाषाया अवतरणम्, अर्थम्, प्रयोजनम्, ज्ञापकञ्च लिखत ।

****